# ॥ श्रीदधिवामनस्तोत्रम् ॥

हेमाद्रिशिखराकारं शुद्धस्पटिकसन्निभम् ।
पूर्णचंद्रनिभं देवं द्विभुजं वामनं स्मरेत् ॥ १ ॥

पद्मासनस्थं देवेशं चंद्रमंडलमध्यगम् ।
ज्वलत्कालानलप्रख्यं तटित्कोटिसमप्रभम् ॥ २ ॥

सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलम् ।
चंद्रमंडलमध्यस्थं विष्णुमच्युतमव्ययम् ॥ ३ ॥

श्रीवत्सकौस्तुभोरस्कं दिव्यरत्नविभूषितम् ।
पीतांबरमुदारांगं वनमालाविभूषितम् ॥ ४ ॥

सुंदरं पुंडरीकाक्षं किरीटेन विराजितम् ।
षोडशस्त्रीयुतं सम्यगप्सरोगणसेवितम् ॥ ५ ॥

ऋग्यजुःसामाथर्वाभिर्गीयमानं जनार्दनम् ।
चतुर्मुखाद्यैर्देवेशैः स्तोत्राराधनतत्परैः ॥ ६ ॥

सनकाद्यैर्मुनिगणैः स्तूयमानमहर्निशम् ।
त्रियंबको महादेवो नृत्यते यस्य सन्निधौ ॥ ७ ॥

दधिमिश्रान्नकवलं रुक्मपात्रं च दक्षिणे ।
करे तु चिंतयेद्वामे पीयूषममलं सुधीः ॥ ८ ॥

साधकानां प्रयच्छंतमन्नपानमनुत्तमम् ।
ब्राह्मे मुहूर्ते चोत्थाय ध्यायेद्देवमधोक्षजम् ॥ ९ ॥

अतिसुविमलगात्रं रुक्मपात्रस्थमन्नं
सुललितदधिखंडं पाणिना दक्षिणेन ।
कलशममृतपूर्णं वामहस्ते दधानं
तरति सकलदुःखाद्वामनं भावयेद्यः ॥ १० ॥

क्षीरमन्नमन्नदाता लभेदन्नाद एव च ।
पुरस्तादन्नमाप्नोति पुनरावर्तिवर्जितम् ।
आयुरारोग्यमैश्वर्यं लभते चान्नसंपदः ॥ ११ ॥

इदं स्तोत्रं पठेद्यस्तु प्रातःकाले द्विजोत्तमः ।
अक्लेशादन्नसिद्ध्यर्थं ज्ञानसिद्ध्यर्थमेव च ॥ १२ ॥

अभ्रश्यामः शुभ्रयज्ञोपवीती सत्कौपीनः पीतकृष्णाजिनश्रीः ।
छत्री दंडी पुंडरीकायताक्षः पायाद्देवो वामनो ब्रह्मचारी ॥ १३ ॥

अजिनदंडकमंडलमेखलारुचिरपावनवामनमूर्तये ।
मितजगत्त्रितयाय जितारये निगमवाक्पटवे बटवे नमः ॥ १४ ॥

श्रीभूमिसहितं दिव्यं मुक्तामणिविभूषितम् ।
नमामि वामनं विष्णुं भुक्तिमुक्तिफलप्रदम् ॥ १५ ॥

वामनो बुद्धिदाता च द्रव्यस्थो वामनः स्मृतः ।
वामनस्तारकोभाभ्यां वामनाय नमो नमः ॥ १६ ॥

॥ इति श्रीवामनपुराणे श्रीदधिवामनस्तोत्रम् ॥